ISSN PRINT 2319 1775 Online 2320 7876

*Research paper* **©2012 IJFANS. All Rights Reserved,** **UGC CARE Listed (Group-I) Journal Volume 8 , Iss2, 2019**

# आयुर्वेदशास्त्रे वेदान्तदर्शनस्य प्रभावः

**Dr. A Manoj Kumar**
Asst.Professor in Vedanta
Calicut Adarsha Vidyaapeetha, Balussery
Mail Id: mk319102@gmail.com

प्रवृत्तिनिवृत्तिपरकः वेदः मानवराशेरूपलभमानेषु साहित्येष्वादिमः परमप्रमाणभूतश्च भवति। "द्वे विद्ये वेदितव्ये..अथ परा यया तदक्षरमधिगम्य ते"[1] इत्युक्त्वा उपनिषदि परा अपरेति विद्याभेदं प्रदर्श्य ब्रह्मविद्या प्रस्तूयते। अत्र पुरोदृश्यमानप्रपञ्चस्य आत्यन्तिकीं सत्तामन्विष्यमाणा चिन्ता प्रत्यगात्मभूते नित्यशुद्धमुक्तस्वरूपे ब्रह्मणि समभ्येति। श्रवणमनननिदिध्यासनैरुपायैः अहंब्रह्मास्मीति साक्षादनुभवोजायते;शरीरेन्द्रियमनोबुद्ध्यादिकं तु केवलमुपाधय एव। उपाध्यन्तर्गतं चैतन्यं जीवइत्युच्यते; निरुपाधिकं चैतन्यं परमात्मा एव। अतः "जीवो ब्रह्मैव नापरः"इति आत्मैकत्वमद्वितीयत्वं समर्थयति।" यद्वाचा अनभ्युदितं येनवागभ्युद्यते तदेव ब्रह्मत्वं विद्धि"[2]इत्यात्मनः अगोचरत्वं तथा "यतो वा इमानि भूतानि जायन्ते"[3]इतितटस्थतया च लक्षणमुच्यते। औपाधिकस्य जीवस्य निरुपाधिकस्य परमात्मनश्च ऐक्यादेव परमपुरुषार्थस्यमोक्षस्योपलब्धिः तदर्थमेव सर्वेषां वेदान्तानां प्रवृत्तिः।

सुखमेव सर्वेषां जन्तूनां परमंलक्ष्यं; सुखाभिलाषिणः भवन्ति सर्वे। इन्द्रियजन्यमनित्यं सुखं सदा न आनन्दयति; अतः स्वरूपोपलब्धिरूपः मोक्ष एव परमपुरुषार्थत्वेन गण्यते। धर्मार्थकाममोक्षाणां चतुर्णां प्रतिपादनमेव वेदवेदाङ्गानाम् इतिहासपुराणानांदर्शनानां वा परमंतात्पर्यम्। पुरुषार्थानुगुणमेव जीवनसाफल्याय बहुविधाः कलाः भौतिकानि आध्यात्मिकानि वा शास्त्राणि; तत्र परमप्रधानं विज्ञानं भवति वैद्यं"सुखार्थः सर्वभूतानां मताः सर्वाः प्रवृत्तयः"[4] इति वर्तते वाग्भटीयं वाक्यम्। उपवेदेषु चतुर्षु अन्यतमः आयुर्वेदः। लोके सर्वत्र आरोग्यशास्त्रस्य विकासः प्राधान्यं च अत्यन्तं वर्तते। जनानां पूर्णारोग्यमेव राज्यपुरोगतेः परमनिदानम्। तदर्थंप्रयतां वैद्यानां स्थानं च देवतुल्यं ततोधिकं वा भवति।अतः छात्राणां वैद्यशास्त्रप्रवेशोऽपि भवति। अतः छात्राणां वैद्यशास्त्रप्रवेशोऽपि धिषणासामर्थ्यातिशयेन भवति। आरोग्यसम्पादनाय रोगनिर्णये तस्य निवारणे च वैद्यशास्त्रस्य, तन्मर्मज्ञानांवैद्यानां च वर्तते, तद्वदेव शारीरकमीमांसायां च विद्यते।

## आयुर्वेदस्य वेदमूलत्वम्

संस्कृतवाङ्मयेऽतिप्रसिद्धं शास्त्रं भवति आयुर्वेदः। संस्कृतेः संस्कृतस्य आयुर्वेदस्य च विकासाय परस्पराश्रयत्वमस्त्येव। वैद्यशास्त्रं शास्त्रेषु मूर्धन्यस्थानमावहति। “भारतं पञ्चमोवेद” इति यथोच्यते तथा आयुर्वेदस्य पञ्चमवेदत्वं ब्रह्मवैवर्तपुराणे प्रतिष्ठापितम्।

“ऋग्यजुसामाथर्वाख्यान् दृष्ट्वा वेदान् प्रजापतिः
विचिन्त्यैतेषामर्थं वै आयुर्वेदं चकार सः।
कृत्वातु पञ्चमं वेदं भास्कराय ददौ विभुः।
स्वतन्त्रं संहितां तस्मात्भास्करश्च चकार सः।”[5]

---

[1]मुण्डकोपनिषद् ७
[2]केनोपनिषद् ४
[3]तैतिरीयोपनिषद् ३.१
[4]अष्टाङ्गहृदयम् २.२०
[5]चरकसूत्रम् १.१५

ISSN PRINT 2319 1775 Online 2320 7876

Research paper ©2012 IJFANS. All Rights Reserved, UGC CARE Listed (Group-I) Journal Volume 8 , Iss2, 2019

वैदिकसाहित्यस्यावलोकने प्राप्यते आयुर्वेदस्य सम्बन्धः। उपवेदस्यास्य वेदमूलत्वं स्पष्टं भवति। सर्वेषां महर्षिणां मन्त्रद्रष्टृणां च चिरजीवनस्य स्वास्थ्यस्य च अभिलाषाउत्कटा अस्ति। "सुखसंज्ञकमारोग्यं"[6],"प्रतिकूलवेदनीयं दुःखम्", "दुःखं त्रिविधमाध्यात्मिकमाधिभौतिकमाधिदैविकमिति" आयुर्वेदज्ञाः अन्ये दार्शनिकाश्च कथयन्ति।

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतंसमाः"[7], " पुत्रपौत्रान्वृणीष्व"[8]," आप्यायन्तु ममाङ्गानि"[9], "वाङ्मे मनसि प्रतिष्ठिता[10] इत्यादिषु वैदिकपाठेषु प्रकटं भवति आरोग्यस्य आयुषः च प्राधान्यम्। पुरुषार्थचतुष्टयेषु धर्मस्य प्राधान्यं निर्विवादम् "शरीरमाद्यं खलु धर्मसाधनम्" इति वाक्यं सूचयति शरीरं सर्वथा संरक्षणीयमिति।

"धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमंरोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च"[11]इति आयुर्वेदस्य लोकोपकारकत्वं स्पृहणीयत्वं च सदा प्राप्यते इति चरकस्याभिप्रायः। विविधचिकित्सापद्धतीनामिषत्परामर्शः दृश्यते चेदपि आयुर्वेदे एव वैद्यशास्त्रस्य विशिष्टोल्लेखः दृश्यते। आयुर्वेदः अथर्ववेदस्य उपाङ्ग इति सुश्रुतेनैव सूच्यते –"इहखलु आयुर्वेदो नाम उपाङ्गमथर्ववेदस्यानल्पादेव प्रजाः श्लोकशतसहस्रमध्यायसहस्रञ्च कृतवान्स्वयम्भूः"[12]इति। वेदस्यानादित्वान्नित्यत्वाच्च तस्याङ्गस्यायुर्वेदस्यापि अनादित्वं नित्यत्वं च कल्प्यते। "स्वयम्भूर्ब्रह्माप्रजाः सिसृक्षुः प्रजानां परिपालनार्थमायुर्वेदमग्रे सृजत् सर्ववित् ततो भूतानि"[13], "सोऽयमायुर्वेदो शाश्वतो निर्दिश्यते" इति।

**आयुर्वेदस्य विकासः**

भरद्वाज एव आयुर्वेदविज्ञानस्य प्रथमाचार्यत्वेनगण्यते। भरद्वाजस्य शिष्यपरम्परया आयुर्वेदस्य विकासः संजातः। ततःपरं पुनर्वसुः तस्य षट् शिष्याः अग्निवेशः भेलः सुश्रुतजतुकर्णः पराशरः हारीतः क्षारपाणिः च आसन्। पूर्विकाणामाचार्याणामेषां सिद्धान्तः संहितारूपेण चरकसंहितायां प्रतिपाद्यते। चरकसंहिता सुश्रुतसंहिता अष्टाङ्गहृदयं प्रयोगसारः इत्यादयः आयुर्वेदस्य प्रामाण्यग्रन्थाः। आयुर्वेदे चिकित्सायाः द्वैविध्यं विद्यते दैवव्यपाश्रय-युक्तिव्यपाश्रयभेदात्। प्रथमं दान-बलि-होम-नियम-प्रायश्चित्तोपवासमन्त्रादिप्रयोगपुरस्सरम् अनुष्ठीयते। द्वितीयं तु रोगनिवृत्तये औषध्यादीनां प्रयोगपुरस्सरं विहितम्।

शरीरे भवः शारीरः, तत्रभवः आत्मा शारीरकः, तस्यात्मतत्त्वस्य प्रतिपादकं शास्त्रं शारीरकमीमांसाशास्त्रमित्युच्यते, स एव वेदान्तः। शरीरसम्बद्धं शास्त्रं भवति वैद्यम्। अन्तःकरणावच्छिन्नं चैतन्यं जीवः,जीवस्योपाधिर्भवति देहेन्द्रियादिकम्। स्थूलसूक्ष्मकारणभेदेन च शरीरं विभज्य तस्योत्पत्ति-विकास-विनाशित्वं च प्रपञ्चते वेदान्तेषु। "आत्मानं रथिनं विद्धि शरीरं रथमेव तु"[14] इत्युक्त्वा देहदेहीविभागः क्रियते विस्तरेण वेदान्तग्रन्थेषु। किं नाम शरीरं शीर्यते प्रतिक्षणमपचीयते इति शरीरम्। उपचयोपायसम्पत्तावपि निरन्तरोपचीयमानत्वं शरीरत्वम्। तथा देह्युपचीयते प्रतिक्षणमाहारस्सारादिना

---

[6]ब्रह्मवैवर्तपुराणम्, ब्रह्मखण्डः २६.९
[7]ईशावास्योपनिषद् २
[8]कठोपनिषद् १.१
[9]केनोपनिषद् शान्तिपाठः
[10]ऐतरेयोपनिषद् शान्तिपाठः
[11]चरकसंहिता १.५.११
[12]सुश्रुतसंहिता १.३.११
[13]चरकसंहिता १.५.११
[14]कठोपनिषद् ३.३

देहत्वमित्यप्यस्ति। आयुर्वेदः त्रिधातून् त्रिगुणान् च अवलम्ब्य प्रवृत्तः। आयुर्वेदस्य प्रथमः प्रधानश्च भागः शरीर एवेति न तत्र सन्देहः। चरकस्तु-

"तत्र शरीरन्नाम चेतनाधिष्ठानभूतं पञ्चमहाभूतविकारसमुदायात्मकम्"[15] इत्याह शरीरविचयाध्याये। "पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिरापो भूमिरिति"[16],"एतान्येव सूक्ष्मतन्मात्राण्यपञ्चीकृतानि चोच्यन्ते"[17]इति उभयशास्त्रोक्तिः। सुश्रुतः- "एवं विवर्धितस्य यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा-शरीरमिति संज्ञा लभते", "भूतमयो देहः" इति वाग्भटाचार्यस्योक्तिः। तत्र सर्वेषामाचार्याणामैककण्ठ्यभिप्रायः शरीरं पञ्चभूतात्मकं भवतीति।

"जीवानुबन्धोचितयोगभाजां खंवायुतेजोजलमेदिनीनां
यस्सन्निपातो मनुजस्वरूपं शरीरमेतत् प्रवदन्त्यभिज्ञाः"
"पुंस्त्री बीजाणुसंयोगजन्यः पिण्डस्सचेतनः।
पुष्टोऽखिलाङ्गप्रत्यङ्गैश्शरीरमिति कथ्यते"
"सजीवः पञ्चभूतानां पिण्डो देह उदाहृतः
निर्जीवस्तु स एवात्र शव इत्यभिधीयते।
देहः कायो वपुर्गात्रं बोधिवर्ष्मकलेवरं
शरीरं विग्रहश्चेति पर्यायाः सदृशार्थकाः"
"महाभूतानि खं वायुरग्निरापःक्षितिस्तथा
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः
तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे॥[18]"

इति चरकवाक्यमुद्धृत्य बृहच्छारीराख्ये ग्रन्थे शरीरं तस्योत्पत्तिः पञ्चात्मकत्वं च विस्तरेण प्रतिपाद्यते।

"अन्योन्यानुप्रविष्टानि सर्वाण्येतानि निर्दिशेत्।
स्वे स्वे द्रव्ये तु सर्वेषां लक्षणमिष्यते॥[19]"

इति सर्वभूतचिन्ताध्याये सुश्रुताचार्यः। एवं भूतानां पञ्चत्वात् पञ्चधाविभक्तमपि चेतनाधिष्ठितं शरीरं त्रिधा विभज्यते चिकित्सासौकर्यार्थं वात-पित्त-श्लेष्म इति। वातमितिपदेन वाय्वाकाशात्मकभूतद्वयं, पित्तपदेन तेजः, श्लेष्मपदेन पृथिवीजलमिति भूतद्वयं चोच्यते। त्रिधातुष्वपि पञ्चाङ्गत्वमस्त्येव।

"वाय्वाकाशमयो वातः पित्तं तेजो मयं स्मृतम्
पृथिव्यम्बुमयः श्लेष्मा तत्र वातः कलेवरम्
उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्तनैः
सम्यग्गत्यान्यधातूनामक्षाणां पाटवेन च
अनुगृह्णात्यविकृतः पित्तं पक्त्यूष्मदर्शनैः
क्षुत्तृड्रूचिप्रभागन्धरसबोधैश्च सर्वदा"

इति बृहच्छारीरे भूतविभागाध्याये शरीरं तस्य प्रकृतिश्च विविच्यते। अतः श्लेष्ममूर्तिमान् पृथिवीजलयोः। अत एव श्लेष्मवृद्धौ स्थौल्यं श्लेष्मक्षये कार्श्यं च देहस्योत्पद्यते। एतेषां त्रिधातूनां समस्थितावारोग्यता।

---

[15]चरकसूत्रम् ३०.२४
[16]चरकसूत्रम् ३०.२५
[17]वेदान्तसारः, खण्डः १२
[18]बृहच्छारीरम्, पृ.११
[19]सुश्रुतसंहिता १.२१

ISSN PRINT 2319 1775 Online 2320 7876

*Research paper* **©2012 IJFANS. All Rights Reserved, UGC CARE Listed (Group-I) Journal Volume 8 , Iss2, 2019**

दर्शनशास्त्रेषु सृष्टिक्रमः, स्थूल-सूक्ष्म-कारणशरीरत्रयोत्पत्तिः, तत्र पञ्चकोशकल्पनं, तद्व्यतिरिक्तात्मतत्त्वप्रतिपादनं च अवलोकयितुं च शक्यते। मध्ये शरीरस्योत्पत्तिक्रमः पञ्चभूतात्मकत्वं त्रिगुणात्मकत्वं च अतिसूक्ष्मतया उक्तम्। मोक्षप्रतिपादनपरायां वेदान्तविद्यायामपि शरीरस्य स्वास्थ्यं, तद्विपरीताः दोषाः, स्वभाववैपरीत्यम् आचारविचारशुद्धिः विषयभोगानां दोषनिर्धारणं कायेन्द्रियमनसां परिपाकश्च यथा सम्भवति तदनुगुणाः पद्धतयः आचार्यैरासूत्रिताः दृश्यन्ते शम-दम-श्रद्धा-आसन-प्राणायामेत्याद्याः। आहार-विहार-विचारविशुद्ध्या मनशुद्धिः, शुद्धेमनसि ज्ञानोदय इति नियमादेव कर्मसिद्धान्तस्य (कर्मयोगस्य),सदाचाराणां वा अत्यन्तम् अनिवार्यता विद्यते सर्वेषु कालेषु देशेषु च।
जीवनदर्शनस्य वैदिकस्य अङ्गभूतोभवति आयुर्वेदः। कालक्रमेण तत्रापि प्रत्येकविभागाः सञ्जाताः नाडी-चर्म-हृदय-अस्थीत्यादिबहुधा। प्रत्येकं विभक्तश्चेदपि शरीरस्वास्थ्यमेवोपदर्शयति, एवम् आयुर्वेदोऽपि वेदस्याङ्गं भवति।

"शरीरं सत्वं संज्ञं च व्याधीनामाश्रयो मतः।
कुष्ठादयः शरीरा एव कामादयस्तु मानसाः॥[20]"
"कर्मणा चोदितो येन तदाप्नोति पुनर्भवः[21]"
निर्विकारो निर्विकृतिः तेन निरोगमात्मनः"[22],
"अनादिपुरुषो नित्यः"[23]

इति वैद्यवेदान्तदर्शनयोः विचारैक्यं दृश्यते।

ब्रह्मचर्येण ब्रह्मनिष्ठतां प्राप्नोति, तस्याः परिस्फूर्तिः गार्हस्थेन वानप्रस्थेन सन्यासेन वा भवति। अतः जीवने धर्मस्य प्राधान्यमभवत्। आत्मैक्यबोधादेव परमपुरुषार्थसिद्धिरित्यतः निश्रेयसकरः श्रेयोमार्गः ज्ञाननिष्ठाइत्युच्यते। ज्ञानमार्गावलम्बनेन रागद्वेषादिविकाराणां कामक्रोधादीनां रिपूणां च निर्गमात् शान्तोदान्तः वीतरागभयक्रोधः स्थितधीः मुनिः भवति। उपनिषत्सु जीवनविन्यासस्य विशुद्धिः दर्शिता। अन्नपानादीनां चिन्तायाश्च परिशुद्धिः उपायत्वेन निर्दिश्यते "मन एव मनुष्याणां कारणं बन्धमोक्षयोः"[24], मनसेवेदमाप्तव्यं नेहनानास्ति किञ्चन"[25] इत्यत्र च मनसः अनुकूलत्वं प्रतिकूलत्वं च विद्यते।

ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत्।
अनपाकृत्य मोक्षस्तु सेवमानो व्रजत्यधः॥[26]"

पूर्णारोग्यमेव सर्वेषां कर्मणामाधारः। अतः पथ्यापथ्यविचारः, गुणत्रयविभागेन वस्तूनां ग्रहणं धातूनां तुलनार्थं केषाञ्चन वर्जनं हानोपादानादिकं तु प्रयोगवशादेवावगन्तुं शक्यते। "नास्तिमूलमनौषधमित्युच्यते", "मिथ्याहारविहाराभ्यां दोषाः ह्यामाशयाश्रिताः"[27]इति वाक्यं तथा आहाराणां सात्विकानां प्रतिपादनं गीतायामन्यत्र च दृष्टुं शक्यते। तत्र देशकालवस्तुभेदेन शास्त्रमेव प्रमाणम्। साङ्ख्यदर्शनस्य तत्त्वानां तथा वैशेषिकाणां योगानां नैयायिकानां मीमांसकानां च विषयस्वीकारः सम्यक् भवति इति आयुर्वेदस्य

---

[20]चरकसूत्रम् १.५५
[21]सुश्रुतसंहिता २.६.१
[22]चरकसंहिता १.५६
[23]चरकसंहिता १.५९
[24]अमृतबिन्द्वोपनिषद् २
[25]कठोपनिषद् २.११
[26]महाभारतम्, पृ.७१
[27]चरकसूत्रम् १.३.३

ISSN PRINT 2319 1775 Online 2320 7876

Research paper ©2012 IJFANS. All Rights Reserved, UGC CARE Listed (Group-I) Journal Volume 8 , Iss2, 2019

सामान्यपठनेन ज्ञातुं शक्यते। यथा दर्शनानां परस्पराश्रयत्वं वर्तते तथा आयुर्वेदस्यापि भारतीयदर्शनानां च मिथः महान्सम्बन्धः वर्तते। तत्रवेदान्तदर्शनस्यावबोधः आयुर्वेदस्य स्पष्टावगत्यै उपकारप्रदः भवति। देहस्थितस्य क्लेशापहत्यै तापत्रयनिवृत्यर्थं वा सुखावाप्त्यर्थंवा वेदान्तदर्शनम् आयुर्वेदशास्त्रं च समर्थम् एव।

************

## सहायकग्रन्थसूची


**मुण्डकोपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**केनोपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**कठोपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**तैतिरीयोपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**ऐतरेयोपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**ईशावास्योपनिषद्–** शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**अष्टाङ्गहृदयम्–** श्रीमद्वाग्भटः, श्रीमदरुणदत्तविरचितया सर्वाङ्गसुन्दराख्यया व्याख्यया हेमाद्रिप्रणीतया आयुर्वेदरसायनाह्वया टीकया च समुल्लसितम्, चौखम्बा ओरिएण्टालिया, वाराणसी, सं.२०१७

**ब्रह्मवैवर्तपुराणम्–** गीताप्रेस, गोरखपुर

**चरकसंहिता–** महर्षिः चरकः, सविमर्श-विद्योतिनी हिन्दीव्याख्योपेता, चौखम्बा भारती अकादमी, वाराणसी, सं.२०११

**सुश्रुतसंहिता–** महर्षिः सुश्रुतः, कविराज डा. अम्बिकादत्तशास्त्रीविरचिता आयुर्वेदतत्त्वसन्दीपिका हिन्दीव्याख्या-वैज्ञानिकविमर्शटिप्पणीसहिता, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

**वेदान्तसारः–** श्रीसदानन्दयतिः, श्रीनृसिंहसरस्वतीविरचितया सुबोधिन्या श्रीरामतीर्थविरचितया विद्वन्मनोरञ्जन्या च सहितः, चौखम्बा कृष्णदास अकादमी, वाराणसी, सं.२०१३

**बृहच्छारीरम्–** वैद्यरत्नम् पी.एस्.वारियर्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, सं.२००५।


************